# Rishikashyapaproktam Shivapanchaksharatattvopadesham

# ऋषिकश्यपप्रोक्तं शिवपञ्चाक्षरतत्त्वोपदेशम्

## Document Information

Text title : Rishikashyapaproktam Shivapanchaksharatattvopadesham

File name : RRiShikashyapaproktaMshivapanchAkSharatattvopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 7 | vAvRittashlokAH ||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ऋषिकश्यपप्रोक्तं शिवपञ्चाक्षरतत्त्वोपदेशम्

(शिवरहस्यान्तर्गते भीमाख्ये)

कश्यपः (उवाच)

विद्यां हृद्यां ददाम्येव तव पञ्चाक्षरात्मिकाम् ।
पञ्चाक्षरपरोमर्त्यः शिवज्ञानाय कल्पते ॥ १४॥

तेन मुक्तो भवत्येव विद्यया द्योततेऽण्डज ।
पितेवोपदिशेन्मन्त्रं गायत्र्याः सममेव हि ॥ १५॥

गायन्तं त्रायते यस्मात् गायत्री भर्गचिह्निता ।
संसारभर्जको भर्गः शिव एवेति निश्चिनु ॥ १६॥

पञ्चाक्षरं च गायत्री श्रौतमन्त्रद्वयं स्मृतम् ।
उभयोर्दैवतं यस्मात् महादेवो महेश्वरः ॥ १७॥

गायत्रीवत्सदा जप्यो मन्त्रराजोऽयमुत्तमः ।
तस्मात्तवोपदेक्ष्यामि मन्त्रं पञ्चाक्षरं परम् ॥ २०॥

मन्त्रेणानेन देवेशं यः पूजयति शङ्करम् ।
सर्वपापविमुक्तश्च जायते नात्र संशयः ॥ २१॥

पञ्चाक्षरं सतारं यः प्रजपेत्प्रीतिपूर्वकम् ।
स तु मुक्तो भवत्येव षडक्षरसमाश्रयात् ॥ २२॥

पञ्चास्यध्याननिरतः पञ्चाक्षरजपादरः ।
महापापयुतो वापि युक्तो वाप्युपपातकैः ॥ २३॥

विमुच्यते सद्य एव राहुमुक्त इवोडुराट् ।
न गायत्र्याः परो मन्त्रो न च पञ्चाक्षरान्मनुः ॥ २४॥

द्विजत्वेनैव सा प्रोक्ता गायत्री भर्गदेवता ।
शिवप्रसादसिध्यर्थं श्रीमत्पञ्चाक्षरो मनुः ॥ २५॥

गात्र्यामेव गायत्री भर्गशब्दे शिवात्मके ।
शिवः पञ्चाक्षराकारः पञ्चवर्णाः शिवस्य खे ॥ ३०॥

वर्णपञ्चाक्षरस्यास्य पञ्चास्यक्रमतः शिवे ।
लीयन्ते किल कल्पान्ते प्रणवो हृदये शिवे ॥ ३१॥

तस्माच्छ्रुतिषु सर्वत्र शिवो गीतः सदाशिवोम् ।
ईशानः सर्वविद्यानामीश्वरः सर्वभूतकृत् ॥ ३२॥

ब्रह्मैव सर्वदा शम्भुः ब्रह्मणोऽधिपतिः शिवः ।
नकारश्च लयं याति सद्योजातास्यके शिवे ॥ ३३॥

मकारोऽपि लयं याति वामदेवास्यके शिवे ।
शिकारोऽपि हि लीयेत अघोरास्ये महेश्वरे ॥ ३४॥

वकारोऽपि च लीयेत शिवे तत्पुरुषात्मके ।
यकारोऽपि च लीयेत सर्वाङ्गेऽपि च शङ्करे ॥ ३५॥

एवमेव महामन्त्रमविमुक्ते विशेषतः ।
सतारस्तारको मन्त्रः शैवेभ्य उपदिश्यते ॥ ३६॥

स न जीवेभ्य एवैश ईशानेन दयालुना ।
नातः परतरो मन्त्रस्तारकः पारमैश्वरः ॥ ३७॥

यस्मादुच्चार्यमाणेन शिवरूपं विभासते ।
शिवस्वरूपभावेन स तु साक्षाच्छिवो भवेत् ॥ ३८॥

वर्णेभ्योऽपि परं सारं तारं शिवमयं विदुः ।
अविद्याकर्मपाशेभ्यस्तारणात्तारमेव हि ॥ ३९॥

वर्णास्त्वन्ये तु सगुणा निर्गुणं तारमेव हि ।
सतारं वर्णसहितं शिवरूपावभासकम् ।
संशीलयन् परं याति शिवमेव हि निर्गुणम् ॥ ४०॥

गायत्रीमन्त्रसारं द्विजकुलतिलकाकार सिद्धत्वदायि
मन्त्रोऽयं शिवतोषकृत् सुविहितो वेदान्तभागेष्वपि ।
तारोऽयं परनिगुणप्रवटने शब्दादिरेवैष वै-
भिक्षूणामथ शाम्भवात्मकहृदा संशीलितो मुक्तिदः ॥ ४१॥

॥ इति शिवरहस्यान्तर्गते ऋषिकश्यपप्रोक्तं शिवपञ्चाक्षरतत्त्वोपदेशं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । भीमाख्यः अष्टमांशः । अध्यायः ७ । वावृत्तश्लोकाः ॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 7 . vAvRRittashlokAH ..

Notes:
Ṛṣi Kaśyapa ऋषि कश्यप delivers Upadeśa उपदेश (to Pataṅga पतङ्ग) about the Essence i.e. Tattva of ŚivaPañcākṣhara शिवपञ्चाक्षरतत्त्व, whereby he introduces the mapping of the five faces (functional aspects) of Śiva शिव to the five syllables of the ŚivaPañcākṣharaMantra शिवपञ्चाक्षर मन्त्र i.e. Namaḥ Śivāya नमः शिवाय as follows:
Na न : Sadyojāta सद्योजात
Ma म : Vāmadeva वामदेव
Śi शि : Aghora अघोर
Va व : Tatpuruṣa तत्पुरुष
Ya य : Sarvāṅga सर्वाङ्ग
He elaborates that in the Śruti-s श्रुतिः, Śiva शिव is bespoken as ŚadāŚiva सदाशिव; as Īśāna ईशान, He is the Lord of All Knowledge and Beings; Brahma ब्रह्म is indeed Śambhu शम्भु and Śiva शिव is Brahmaṇo'dhipati ब्रह्मणोऽधिपति.
Ṛṣi Kaśyapa ऋषि कश्यप also explains about Gāyatrī Mantra गायत्री मन्त्र that includes the word Bhargaḥ भर्गः, which indeed is a (manifest) "form" of Śiva शिव; and that Mahādeva Maheśvara महादेव महेश्वर is the Devatā देवता of both ŚivaPañcākṣhara शिवपञ्चाक्षर and Gāyatrī गायत्री.
When ŚivaPañcākṣhara शिवपञ्चाक्षर (that is the Mahāmantra महामन्त्र for the unliberated), is recited with Tāra तार i.e. Oṁ ओं, is known as the ŚivaṢaḍakṣaraMantra शिवषडक्षरमन्त्र i.e. Oṁ Namaḥ Śivāya ओं नमः शिवाय. While Tāra तार i.e. Oṁ ओं is Nirguṇa निर्गुण, the Pañcavarṇa पञ्चवर्ण are Saguṇa सगुण; and, the combination of these Reflect ŚivaRūpa शिवरूप; and one who meditates upon that, experiences the (State of) Nirguṇa Śiva निर्गुण शिव.

Proofread by Ruma Dewan

*Rishikashyapaproktam Shivapanchaksharatattvopadesham*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*